# नायक्स टयुटोरिअल्स


Way to Excellence

Year : 2025 - 2026 | नमुना प्रश्नपत्रिका - 3 | पूर्णाकङ्काः : ८०

वर्ग : १० वी (SSC) | संस्कृत - १०० | समय : ३ होरा:

## प्रथमः विभागः सुगमसंस्कृतम् । ०८

प्रश्न .१ .अ) चित्रं दृष्ट्वा नामानि लिखत। (५तः४) ४

१) 
२) 
३) 

४) 
५) 

आ) सङ्ख्याः अक्षरैः /अङ्कैः लिखत। (३तः२) २

(१) पञ्चाशत् (२) एकाशीतिः (३) ८६

इ) समय - स्तम्भमेलनं कुरूत। २

| अ | आ |
|---|---|
| १) पञ्चाधिक - नववादनम् | २ .४५ |
| २) पादोन - त्रिवादनम् | ४ .२० |
| ३) सार्ध - द्वादशवादानम् | ९ .०५ |
| ४) विंशत्यधिक - चतुर्वादनम् | १२ .३० |

## द्वितीयः विभागः गद्यम् २०

प्रश्न .२ .अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः करूत।

अथ प्राप्तः सुदासस्तदुद्यानं, यत्र **भगवतः** सुगतस्य निवासः । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स **महात्मा** । अनल्पेन **धाम्ना** राजते स्म तस्य **भगवतो** वदनम् । तदालोकयतः सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं **भगवतः** सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो **भगवते**' इति वदन् सविनयं प्राणमत् ।

तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो **भगवान्** अभाषत, "वत्स, किमिच्छसि ?" इति। एवम् उक्तवति सुगते निरिच्छः सुदासः प्रत्यवदत्, "**भगवन्** किमन्यत्? केवलं **भगवतः** चरणकमलस्पर्शेन **आत्मा** मे कृतार्थतां लभताम्" इति ।

एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् **भगवान्** सुगतः । अहो प्रभावः सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाणः सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान् ।

एष सुगतः एव ननु **भगवान्** गौतमबुद्धः ।

१) अवबोधनम् (४ तः३) ३

अ) कः कं वदति ? " वत्स,किमिच्छसि?"

आ) पूर्णवाक्येन उत्तरं लिखत।

महात्मा कुत्र उपविष्टः आसीत् ?

इ) एषः गद्यान्शः कस्मात् पाठात् उद्धृतः?

ई)वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत। सुगतः देवालये वृक्षस्यअधः उपविष्टः।


२) शब्दज्ञानम्। (३तः२) २

अ) सन्धिविग्रहं कुरूत। इत्यब्रवीत् = . . . . . . . + . . . . . .

आ) गद्यांशात् धातुसाधित - अव्यये चिनुत लिखत च।

त्वान्त अव्ययम् = . . . . . . . . ल्यबन्त अव्ययम् = . . . . . . .

इ) स्थानाधारेण शब्दपेटिकां पूरयत। २



(वटवृक्षः,नगरम् ,अश्मखण्ड, उद्यानम् )

प्रश्न .२ .आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः करूत।

महोदयः – महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः ।

समीरः – तिष्ठतु तावत् । तर्हि अवश्यं मेलयामि मे मित्राणि । एते सर्वेऽपि परिषदि सहभागिनः ।

प्रसादः – (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः । प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा – पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीरः – भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान-योगशास्त्र-इतिहास- स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।

१) अवबोधनम् (४ तः३) ३

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१) अहं . . . . . . . . छात्रः। (रसायनशास्त्रस्य / वाणिज्यशाखायाः)

२) एते सर्वेऽपि . . . . . . . . सहभागिनाः। (परिषदि/कार्यशालायम्)

आ) कः कं वदति।

"अवश्यं मेलयामि मे मित्राणि।"

इ) पूर्णवाक्येन उत्तरं लिखत।

संस्कृतश्लोकदीनां पठनेन कः लाभ ?

ई) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं वा इति लिखत।

भरतमुनिना नाटयशास्त्रविषयकः ग्रन्थः रचितः।

२) शब्दज्ञानम्। (३तः२) २

अ) प्रश्ननिर्माणं कुरूत।

पार्श्वनिवेदनम् इति <u>तनुजायाः</u> व्यवसायः।


आ) सन्धिविग्रहं कुरूत।

विदेशेष्वपि = . . . . . .+ . . . . . .

इ) लकारं लिखत।

इति <u>आसीत्</u> मे मतिः।

३) जालरेखाचित्रं पूरयत। २




प्रश्न .२ .इ) माध्यमभाषया सरलार्थं लिखत। (२तः१) ४

१) **वसन्तसेना –** रदनिके! स्वागतं ते । कस्य पुनरयं दारकः? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

**रदनिका –** एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

**वसन्तसेना –** (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम् । अथ किं निमित्तमेष रोदिति?

२) वैखानसः – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः – प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

ई) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) शक्रस्य कपटं विशदी कुरूत।

२) विश्वामित्रः नद्यौ किं प्रार्थयत् ?

## तृतीयः विभागः पद्यम् १८

प्रश्न .३ .अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।

१) पद्यांशं पठित्वा निर्दिष्टे कृती कुरूत। (३तः२) २

(१) **रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्**
**अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।२।।**

(२) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं **विद्याविहीनः पशुः**।।१।।

(३) घंट भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिध्दः पुरूषो भवेत्॥

क) पूर्णवाक्येन उत्तरं लिखत।

कविः चातकं किम् उपदिशति ?

ख) विशेषण - विशेष्ययोः मेलनं कुरूत।


| अ | आ |
|---|---|
| १) दीनं<br>२) परं | प्रसिद्धः<br>वचः<br>दैवतम् |

ग) उत्तरपदं लिखत।

१) वृष्टिभिरार्द्रयन्ति = वृष्टिभिः + . . . . . . . . ।

२) कुर्याद्रासभरोहणम् = कुर्यात् + . . . . . . . . ।

२) जालरेखाचित्रं पूरयत। २




आ) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) कदा मदः व्यपगच्छति ?

२) 'येन केन प्रकारेण' इति उक्ति स्पष्टिकुरूत।

इ) पद्ये शुध्दे पूर्णे च लिखत। (क,ख तः १,/ग,घ तः १) ६

१) (क) प्रथमवयसि . . . . . . . . . विस्मरन्ति ॥ अथवा (ख) रथस्यैकं . . . . . . . . . नोपकरणे ॥

२) (ग) अल्पानामपि . . . . . . . . मत्तदन्तिनः ॥ अथवा (घ) यादृशं . . . . . . . फलम् ॥

ई) अन्वयं लिखत। (३तः२) २

यत्र . . . . . . न अस्ति तत्र . . . . . अपि श्लाघ्यः भवति। निरस्तपादपे . . . एरण्डः अपि . . . . ।

उ) सरलार्थ लिखत। (३तः२) ४

१) यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्म सर्वे धर्माः समाश्रिताः ॥

२) आत्मौपम्यं समाश्रित्य मानवो मानवैः सह।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ॥

३) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥

## चतुर्थः विभागः लेखनकौशलम् ९

प्रश्न.४.अ) धातूनाम् /अव्ययानाम् उपयोगं कृत्वाः वाक्यनिर्माण कुरूत (६तः४) ४

१) बहिः २) विना ३)स्निह् (४ प.प) ४) समीपे
५) रूच् -रोच् (१आ.प) ६) गम् - गच्छ् (१प.प)

अथवा

संस्कृतानुवादं कुरूत। (६तः४) ४


| | |
|---|---|
| 1) Narendra modi is the prime minister of india. | १) नरेंद्र मोदी भारताचे पंतप्रधान आहेत. |
| 2) Police stops the vehicle. | २) पोलिसांनी वाहन थांबवले. |
| 3) The farmer ploughs the field. | ३) शेतकरी शेताची नांगरणी करतो. |
| 4) Behind the Temple there is mountain. | ४) मंदिराच्या मागे डोंगर आहे. |
| 5) River water is clean. | ५) नदीचे पाणी स्वच्छ आहे |
| 6) Rahul is searching the file. | ६) राहुल फाईल शोधत आहे. |

आ) ५/७ वाक्यात्मकं निबन्धं लिखत।(३ तः१) ५

१) मम प्रिय उत्सवः। २) मम प्रियः कवि। ३) मम प्रियं पुस्तकम्।

अथवा

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यत्मकं चित्रवर्णनं कुरूत ।



(मञ्जूषा - सूर्यः,पर्वतः, वृक्षः, नदी , जलम् , उदयति , खगः, मेघाः, गुल्मकम् )

पञ्चमः विभागः भाषाभ्यास ः | १७

प्रश्न .५ ) अ) तालिका पूर्ति कुरूत | ८

(१) नामतालिका पूरयत | (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| ....... | ....... | राजभ्यः | चतुर्थी |
| ....... | श्रीमतोः | ....... | षष्ठी |
| वाचि | ....... | ....... | सप्तमी |

(२) सर्वनाम तालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | विभक्ति |
|---|---|---|---|
| अनया | ....... | ....... | तृतीया |
| ....... | भवन्तौ | ....... | द्वितीया |
| ....... | ....... | अस्मत् | पञ्चमी |

(३) क्रियापदतालिका पूरयत (६ तः ४) २

| ए.व | द्वि.व | ब.व | पुरूष | लकार |
|---|---|---|---|---|
| भवेत् | ....... | ....... | प्र.पु | लिङ् |
| पूजयसे | ....... | ....... | म.पु | लट् |
| ....... | ....... | करवाम | उ.पु | लोट् |

(४) धातुसाधित विशेषण तालिका (६ तः ४) २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ /शानच |
|---|---|---|---|---|
| ज्ञा (९आप) | ....... | ....... | ज्ञातव्यः | जानन् /जानानः |
| प्रच्छ् -पृच्छ् (६ प.प) | पृष्टः | पृष्टवान् | ....... | ....... |
| आ+रूह्+रोह् (१ प.प) | आरूढः | ....... | आरोहणीयः | ....... |

आ) निर्दिष्टाः कृतीः कुरूत | (४ तः ३) ९

१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्ति कुरूत। (५तः३) ३

क) माता .......(५) मम युतकं प्रक्षलितवती। (आवृत्तिवाचकम्)

ख) भगवताः व्यासेन ........ (१८) पुराणनि रचितानि। (संख्यावाचकम्)

ग) पौषमासः संवत्सरस्य ........ (१०) मासः। (क्रमवाचकम्)

घ) अस्माकं कुटुम्बं संवत्सरस्य........(१) पर्यटनार्थ गच्छति। (आवृत्तिवाचकम्)

ड) .........(३) महिलाः जलमाहर्तु गच्छन्ति। (सङ्ख्यावाचकम्)

२) समासानां तालिकापूर्ति कुरूत |(५ तः ३) ३

| समास | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| शुकसारिकाः | ......... | इतरेतर-द्वन्द्वः। |
| ......... | भारतः नाम देशः | कर्मधारयः। |
| अपरिचितः | न परिचितः। | ......... |
| विद्याविहीनः | ......... | तृतीया - तत्पुरूष। |
| ......... | क्षेत्रस्य पतिः | षष्ठी - तत्पुरूष। |

३) समानार्थकशब्दान् /विरूध्दार्थकशब्दान् लिखत | (५ तः ३) ३

१. सद्गुणाः × .......... | २. नभः = .......... |

३. विपुलम् × .......... | ४. पिता = .......... |

५. समानः × ......... |

४) सूचनानुसारं कृतीः कुरूत | (५ तः ३) ३

१) त्वं धनुः त्यज | ('त्वं' स्थाने 'भवान्' योजयत)

२) जनाः न सन्तुष्टाः | (एकवचने लिखत)

३) किं दृष्टं त्वया ? | (वाच्यपरिर्वनं कुरूत)

४) जनाः वन्यपशून् द्रष्टुम् आगच्छन्ति स्म | (स्म निष्कासयत !)

५) मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् | (पुर्वकालवाचकं - त्वान्त - अव्ययं निष्कासयत)

षष्ठः विभाग - अपठितम्। ८

प्रश्न.६.अ) गद्यांशंपठित्वानिर्दिष्टाः कृतीः कुरूत। (६तः४) ४

भारतीय-स्वातन्~यसैनिकानां मध्ये अग्रेसरा मादामकाम-महोदय मुम्बई नगरे, परसीकपरिवारे १८६१ तमे खिस्ताब्दे जनिम् अलभत। सा अतीव मेधाविनी आसीत्। तदा भारते आङ्ग्लशासकानां दमननीतिः असह्या जाता आसीत्। अतः भारतीयाः स्वातन्~यार्थ यथाशक्ति प्रयत्नशीलाः आसन्। स्वातन्~यङ्ग्रामे मादामकामायाः सहभागः अपि लक्षणीयः। भारतदेशः कथं स्वतन्त्रः भवते् इति तस्याः महती चिन्ता। एतदर्थे लोकजागरणम् अत्यावश्यकम् इति सा अमन्यत। तदर्थ भाषण -लेखन - प्रकाशन -द्वारा सा लोकजागरणं प्रारभत।

१) पूर्णवाक्येन उत्तरत - मादामकामा - महोदया कुत्र जनिम् अलभत ?

२) प्रातिपदिकं लिखत - (क) भारतीयाः। (ख) सा।

३) वाक्यं पुनर्लिखित्वा सत्यं /असत्यं लिखत।

मादाम कामा लोकजागरणं न आरभत।

४) माध्यमाभाषया सरलार्थ लिखत

भारतदेशः कथं स्वतन्त्रः भवेत् इति तस्याः महती चिन्ता।

५) गद्यांशात् द्वे सप्तमीविभक्तन्तपदे लिखत - ........,........|

६) कारकपरिचयं कुरूत। स्वातन्त्रयङ्ग्रामे मादामकामायाः सहभागः अपि लक्षणीयः ।

आ) पद्यांश पठित्वा निर्दिष्टाः कृतीः कुरूत। २

यः स्वभावः हि यस्य अस्ति सः नित्यं दुरतिक्रमः ।
श्वानं यदि क्रियते राजा सः किं न अश्नाति उपानहम् ॥


१) पूर्णवाक्येन उत्तरत। (२तः१)

(क) स्वभावः नित्यं किदृशम् अस्ति ? (ख) श्वानं किम् अश्नाति ?

२) गद्यांशात् चित्वा समानर्थकं पदं लिखत - सारमेयः ।

इ) पद्यांशं पठित्वाजालरेखाचित्रं पूरयत। २

रविः चन्द्रः घनाः वृक्षाः नदी गावः च सज्जनाः ।
एते परोपकाराय लोके देवेन निर्मिताः ॥




**** ****